नाम धर्म्मात्मा प्रजाकामः स चाप्रजाः। विदर्भराजदुहिता केशिनी नाम नामतः। ज्येष्ठा सगरपत्न्यासीद्धर्म्मिष्ठा सत्यवादिनी। अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि। द्वितीया सगरस्यासीत् पत्नी परमधार्म्मिकी” इत्युपक्रम्य। “अथ कालेन महता पुत्रं ज्येष्ठा व्यजायत। असमञ्ज इति ख्यातं काकुत्स्थं सगरात्मजम्” रामा०आ०२०अ०। “असमञ्जा इति ख्यातः सगरस्य सुतोऽह्यभूत्। यं शैब्या जनयामास पौराणां स हि दारकान्। गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्बलान्। ततः पौराः समाजग्मु र्भयशोकपरिप्लुताः। सगरञ्चाभ्ययाचन्त सर्व्वे प्राञ्जलयः स्थिताः। त्वं नस्त्राता महाराज! परचक्रादिभिर्भयात्। असमञ्जोभयाद्घोरात्ततो नस्त्रातुमर्हसि। पौराणां वचनं श्रुत्वा घोरं नृपतिसत्तमः। मुहूर्त्तं विमना भूत्वा सचिवानिदमब्रवीत्। असमञ्जाः पुराद्द्य सुतो मे विप्रवास्यताम्। यदि वो मत्प्रियं कार्य्यमेतच्छीघ्रं विधीयताम्। एवमुक्ता नरेन्द्रेण सचिवास्ते नराधिप!। यथोक्तं त्वरिताश्चक्रु र्यथा ज्ञापितवान्नृपः। एतत्ते सर्व्वमाख्यातं यथा पुत्रो महात्मना। पौराणां हितकामेन सगरेण विवासितः” भा०व०प० १०७ अ०। असच्। असमञ्जसोऽपि तस्मिन्नर्थे “असमञ्जस इत्युक्तः स केशिन्या नृपात्मजः। तस्य पुत्रोऽंशुमान्नाम पितामहहिते रतः”। “असमञ्जस आत्मानं दर्शयन्नसमञ्जसम्। जातिस्मरः पुरा सङ्गाद्योगी योगाद्विचालितः। आचरन् गर्हितं लोके ज्ञातीनां कर्म्म विप्रियम्। सरय्वां क्रीड़तो बालान् प्रास्यदुद्वेजयन् जनान्। एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै। योगैश्वर्य्येण बालांस्तान् दर्शयित्वा ततो ययौ। अयोध्यावासिनः सर्व्वे बालकान् पुनरागतान्। दृष्ट्वा विसिस्मिरे राजन्! राजा चाप्यन्वतप्यत” भाग० ९स० ८अ०।

**असमद** त्रि० सह मदेन गर्व्वेण समदः कलहः स नास्ति यत्र। कलहरहिते विरोधशून्ये। “तथैभ्योऽसमदं करोति तदभितपति” “ताभ्य एवैतत्सह सतीभ्योऽसमदं करोति” इति च शत०ब्रा० “असमदमकलहं परस्पराविरोधम्” भा०।

**असमन** त्रि० असममतुल्यत्वं भिन्नवर्णत्वात् नयति नी—ड। विभिन्नवर्णे “असमना अजिरासो रघुष्यदः” ऋ० ११४०,४, असमना भिन्नवर्णाः भा०।

**असमनेत्र** पु० असमानि अयुग्मानि नेत्राण्यस्य। त्रिनेत्रे शिवे असमलोचनादयोऽप्यत्र।

**असमय** पु० अपकृष्टार्थे न०त०। १दुष्टकाले २अयोग्यकाले च “असमये मतिरुन्मिषति ध्रुवम्” नैषधचरिते ४सर्गः।

**असमर्थ** त्रि० समर्थः शक्तः न०त०। १अशक्ते २दुर्बले च। समर्थः सङ्गतार्थः न०त०। असङ्गतार्थे, व्याकरणशास्त्रप्रसिद्धे यत्र यस्यान्वययोग्यता तत्सहचारानपेक्षायुक्ते ३समासे यथा असूर्य्यम्पश्येत्यादौ असमर्थसमासः नञ्पदस्य असूर्य्येण सहान्वयायोग्यत्वात् भोजनेन च सहचाराभावेऽपि तत्रान्वयस्य अपेक्षणीयत्वात्तथात्वम्।

**असमर्थसमास** पु० कर्म्म०। येन सह यस्य अन्वयस्तद्व्यतिरेकेण अन्यान्वितेन पदेन समासे। यथा अश्राद्धभोजीति असूर्य्यं पश्येत्यादि। [कन्दर्पे असमसायकादयोऽप्यत्र।

**असमवाण** पु० असमा अयुग्मानि वाणा अस्य। पञ्चवाणे

**असमष्ट** त्रि० सम+अश—क्त न०त०। अव्याप्ते। “पितामतीनामसमष्टकाव्यः” ऋ०९,७६,४, “असमष्टकाव्यः अव्याप्तकर्म्मेति” भा०।

**असमवायिकारण** न० समवैति सम+अव—इण—णिनि न०त०कर्म्म०। न्यायमते समवायिकारणं द्रव्यं तद्भिन्नं द्रव्यवृत्ति यत् गुणादिकं कारणं तस्मिन्नर्थे। यथा कपालद्वयसंयोगरूपो गुणो घटस्य, द्रव्याश्रिता क्रिया संयोगविभागादेः। “समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्”। “यत् समवेतं कार्य्यं भवति ज्ञेयन्तु समवायि जनकं तत्”। “तत्रासन्नं जनकं द्वितीयम्” “गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्” इति च भाषा०व्याख्यातञ्चैतत् मुक्ता०। “तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामिच्छाद्यसमवायिकारत्वं स्यात् तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम्, आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्य्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले